NCERT Archive

SOLUTIONS BOOK

CLASS 8

Sanskrit · Deepakam

CHAPTER 2

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका

Complete Exercise Solutions · सम्पूर्ण अभ्यास-समाधान

अभ्यासात् जायते सिद्धिः

परियोजनाकार्यम्

Contents

Class 8 Sanskrit · Deepakam · Chapter 2 — अल्पानामपि वस्तूनां संहतिः कार्यसाधिका

EX **अभ्यासात् जायते सिद्धिः**
8 questions · Q1 Q2 Q3 Q4 Q5 Q6 Q7 Q8 — 3

PR **परियोजनाकार्यम्**
2 questions · Q1 Q2 — 13

Every question is followed by its answer. Question numbers above are clickable and the PDF bookmarks panel lets you jump to any exercise set or question.
The word-meaning tables of the lesson (pp. 15–16) already give Hindi and English meanings; their column "मातृभाषया अर्थं लिखत" is for each student's own mother tongue.
हिन्दी: प्रत्येक प्रश्न के बाद उसका उत्तर दिया गया है। ऊपर प्रश्न-संख्याओं पर क्लिक करके सीधे वहाँ जाया जा सकता है। पाठ की शब्दार्थ-तालिकाओं (पृ. 15–16) में हिन्दी और अंग्रेज़ी अर्थ पहले से दिए हैं; "मातृभाषया अर्थं लिखत" स्तम्भ प्रत्येक विद्यार्थी की अपनी मातृभाषा के लिए है।

NCERT Archive

EX

CLASS 8 SANSKRIT · DEEPAKAM · CHAPTER 2

अभ्यासात् जायते सिद्धिः

Solutions · 8 questions · समाधान · ८ प्रश्न

QUESTION 1 प्रश्न 1

१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—

(क) मित्राणि ग्रीष्मावकाशे कुत्र गच्छन्ति ?

(ख) सर्वत्र कः प्रसृतः ?

(ग) कः सर्वान् प्रेरयन् अवदत्?

(घ) कः हितोपदेशस्य कथां श्रावयति ?

(ङ) कपोतराजस्य नाम किम्?

(च) व्याधः कान् विकीर्य जालं प्रसारितवान्?

(छ) विपत्काले विस्मयः कस्य लक्षणम्?

(ज) चित्रग्रीवस्य मित्रं हिरण्यकः कुत्र निवसति ?

(झ) चित्रग्रीवः हिरण्यकं कथं सम्बोधयति ?

(ञ) पूर्वं केषां पाशान् छिनत्तु इति चित्रग्रीवः वदति ?

ANSWER उत्तर

(क) उत्तराखण्डम्
Uttarakhand · उत्तराखण्ड
p. 10 — "...देवभूमिम् उत्तराखण्डम् अगच्छन्।"

(ख) अन्धकारः
Darkness · अन्धकार
p. 10 — "सहसा सर्वत्र अन्धकारः प्रसृतः।"

(ग) नायकः
The leader (nayaka) · नायक (नेता)
p. 10 — "...नायकः सुधीरः सर्वान् सान्त्वयन् प्रेरयन् च अवदत्।"

(घ) नायकः
The leader (nayaka) · नायक (नेता)
p. 11 — "अहं हितोपदेशस्य एकां कथां श्रावयामि।"

NCERT Archive

(ङ) चित्रग्रीवः
Chitragriva · चित्रग्रीव
p. 12 — "चित्रग्रीवनामा कपोतराजः..."

(च) तण्डुलकणान्
Rice grains · चावल के दाने
p. 12 — "व्याधः तण्डुलकणान् विकीर्य जालं विस्तीर्य..."

(छ) कापुरुषस्य
Of a coward · कायर का
p. 12 — "विपत्काले विस्मयः एव कापुरुषलक्षणम् ।"

(ज) चित्रवने
In Chitravana (on the bank of the Gandaki) · चित्रवन में (गण्डकी के तट पर)
p. 13 — "...गण्डकीतीरे चित्रवने निवसति ।"

(झ) सखे
"Friend!" · हे मित्र! (सखा का सम्बोधन)
p. 13 — "सखे हिरण्यक!"

(ञ) मदाश्रितानाम्
Of those who depend on me · जो मेरे आश्रित हैं उनके
p. 14 — "पूर्वं मदाश्रितानाम् एतेषां पाशान् छिनत्तु..."

(क) उत्तराखण्डम् · (ख) अन्धकारः · (ग) नायकः · (घ) नायकः · (ङ) चित्रग्रीवः · (च) तण्डुलकणान् · (छ) कापुरुषस्य · (ज) चित्रवने · (झ) सखे · (ञ) मदाश्रितानाम्

NCERT Archive

QUESTION 2 प्रश्न 2

२. पूर्णवाक्येन उत्तरं लिखत—

(क) यदा केदारक्षेत्रम् आरोहन्तः आसन् किम् अभवत्?

(ख) सर्वे उच्चस्वरेण किं प्रार्थयन्त ?

(ग) असम्भवं कार्यं कथं कर्तुं शक्यते इति नायकः उक्तवान्?

(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः किं निरूपयति ?

(ङ) किं नीतिवचनं प्रसिद्धम्?

(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कम् आदेशं दत्तवान्?

(छ) हिरण्यकः किमर्थं तूष्णीं स्थितः?

(ज) पुलकितः हिरण्यकः चित्रग्रीवं कथं प्रशंसति ?

(झ) कपोताः कथं आत्मरक्षणं कृतवन्तः ?

(ञ) नायकस्य प्रेरकवचनैः सर्वेऽपि किम् अकुर्वन् ?

ANSWER उत्तर

(क) यदा मित्राणि श्रीकेदारक्षेत्रम् आरोहन्तः आसन् तदा लक्ष्यप्राप्तेः पूर्वं वेगेन वृष्टिः आरब्धा ।

p. 10 (When the friends were climbing towards Kedar, heavy rain began before they reached their goal.)
हिन्दी: जब मित्र केदारक्षेत्र की ओर चढ़ रहे थे, तब लक्ष्य पर पहुँचने से पहले तेज़ वर्षा शुरू हो गई ।

(ख) सर्वे उच्चस्वरेण “हे भगवन्! रक्ष अस्मान् रक्ष” इति ईश्वरं प्रार्थयन्त ।

p. 10 (All prayed loudly to God: “O Lord! Save us, save us!”)
हिन्दी: सब ऊँचे स्वर से ईश्वर से प्रार्थना करने लगे — “हे भगवन्! हमारी रक्षा करो, रक्षा करो ।”

(ग) नायकः उक्तवान् यत् आत्मविश्वासबलेन सम्भूय असम्भवम् अपि कार्यम् अवश्यं साधयितुं शक्यते ।

p. 11 (By self-confidence and by uniting, even an impossible task can surely be done.)
हिन्दी: आत्मविश्वास के बल से और मिलकर असम्भव कार्य भी अवश्य किया जा सकता है ।

(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः निरूपयति यत् अत्र निर्जने वने तण्डुलकणानां सम्भवः कुतः? अत्र कश्चित् व्याधः भवेत् ।

p. 12 (He reasons: how can rice grains be here in a lonely forest? A hunter may be around.)
हिन्दी: वह विचार करता है — सुनसान वन में चावल के दाने कैसे? यहाँ कोई शिकारी हो सकता है ।

(ङ) “लघूनाम् अपि वस्तूनां संहतिः कार्यसाधिका भवति” इति नीतिवचनं लोकसिद्धम् ।

p. 13 (The well-known saying: even of small things, union accomplishes the task.)
हिन्दी: प्रसिद्ध नीतिवचन: छोटी वस्तुओं का भी समूह कार्य सिद्ध करने वाला होता है ।

(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः “सर्वैः एकचित्तीभूय जालम् आदाय उड्डीयताम्” इति आदेशं दत्तवान् ।

p. 13 (All should fly away together, with one mind, carrying the net.)
हिन्दी: सब एकमन होकर जाल लेकर उड़ जाएँ ।

NCERT Archive

(छ) हिरण्यकः कपोतानाम् अवपातभयात् चकितः तूष्णीं स्थितः।

p. 13 (Hiranyaka stayed silent, startled, fearing the pigeons' descent.)
हिन्दी: कबूतरों के उतरने के भय से हिरण्यक चकित होकर चुप रहा।

(ज) पुलकितः हिरण्यकः "साधु मित्र! साधु। अनेन आश्रितवात्सल्येन त्वं त्रैलोक्यस्यापि स्वामित्वं प्राप्तुं योग्योऽसि" इति चित्रग्रीवं प्रशंसति।

p. 14 ("Well done! With this affection for dependants you deserve lordship even of the three worlds.")
हिन्दी: "शाबाश मित्र! शरण में आए हुओं के प्रति इस प्रेम से तुम तीनों लोकों का स्वामित्व पाने योग्य हो।"

(झ) कपोताः बुद्धिबलेन संघटनसामर्थ्येन च आत्मसंरक्षणं कृतवन्तः।

p. 14 (The pigeons saved themselves by the power of intelligence and the strength of unity.)
हिन्दी: कबूतरों ने बुद्धिबल और संगठन की शक्ति से अपनी रक्षा की।

(ञ) नायकस्य प्रेरकवचनैः उत्साहिताः सर्वेऽपि भयं शोकं सन्देहं च विहाय सेतुनिर्माणकार्ये संलग्नाः जाताः।

p. 14 (Encouraged, all gave up fear, grief and doubt and engaged in building the bridge.)
हिन्दी: सब भय, शोक और सन्देह छोड़कर पुल-निर्माण के कार्य में लग गए।

QUESTION 3 प्रश्न 3

३. अधोलिखितानि वाक्यानि पठित्वा ल्यप्-प्रत्ययान्तेषु परिवर्तयत—

(क) छात्रः कक्षां प्रविशति । संस्कृतं पठति ।

(ख) भक्तः मन्दिरम् आगच्छति । पूजां करोति ।

(ग) माता भोजनं निर्माति । पुत्राय ददाति ।

(घ) सुरेशः प्रातः उत्तिष्ठति । देवं नमति ।

(ङ) रमा पुस्तकं स्वीकरोति । विद्यालयं गच्छति ।

(च) अहं गृहम् आगच्छामि । भोजनं करोमि ।

(छ) तण्डुलकणान् विकिरति । जालं विस्तारयति ।

(ज) व्याधः तण्डुलकणान् अवलोकते । भूमौ अवतरति ।

ANSWER उत्तर

Rule used: when the first action is completed before the second, **क्त्वा** is normally used; if the verb has an **upasarga** (प्र, आ, वि, उत्, अव …), **ल्यप्** replaces it. Only the final "य" remains. The first verb is changed to its ल्यप्-form and the sentence is joined into one.
हिन्दी: जब पहली क्रिया पूरी होकर दूसरी क्रिया होती है तो सामान्यतः **क्त्वा** होता है; यदि धातु से पहले **उपसर्ग** (प्र, आ, वि, उत्, अव …) हो तो **ल्यप्** होता है और केवल "य" शेष रहता है। पहली क्रिया को ल्यप्-रूप में बदलकर दोनों वाक्य जोड़ दिए जाते हैं।

(क) छात्रः कक्षां प्रविश्य संस्कृतं पठति ।

प्र + विश् + ल्यप् → **प्रविश्य** (given in the book as the example · पुस्तक में उदाहरण के रूप में दिया है)

(ख) भक्तः मन्दिरम् आगत्य पूजां करोति ।

आ + गम् + ल्यप् → **आगत्य**

NCERT Archive

(ग) माता भोजनं निर्माय पुत्राय ददाति ।
निर् + मा + ल्यप् → **निर्माय**

(घ) सुरेशः प्रातः उत्थाय देवं नमति ।
उत् + स्था + ल्यप् → **उत्थाय**

(ङ) रमा पुस्तकं स्वीकृत्य विद्यालयं गच्छति ।
स्वी + कृ + ल्यप् → **स्वीकृत्य**

(च) अहं गृहम् आगत्य भोजनं करोमि ।
आ + गम् + ल्यप् → **आगत्य**

(छ) तण्डुलकणान् विकीर्य जालं विस्तारयति ।
वि + कॄ + ल्यप् → **विकीर्य**

(ज) व्याधः तण्डुलकणान् अवलोक्य भूमौ अवतरति ।
अव + लोक् + ल्यप् → **अवलोक्य**

Each pair of sentences becomes one sentence: the first verb takes its ल्यप्-form (अव्ययम्, it never changes) and the second verb stays as it is.
हिन्दी: प्रत्येक वाक्य-युग्म एक वाक्य बन जाता है — पहली क्रिया ल्यप्-रूप (अव्यय) में बदलती है और दूसरी क्रिया वैसी ही रहती है।

QUESTION 4 प्रश्न 4

४. उदाहरणानुसारम् उपसर्गयोजनेन क्त्वा-स्थाने ल्यप्-प्रत्ययस्य प्रयोगं कृत्वा पदानि परिवर्तयत—

सम् | आ | उप | उत् | वि | प्र

(क) छात्रः गृहं गत्वा भोजनं करोति ।
(ख) माता वस्त्राणि क्षालयित्वा पचति ।
(ग) शिक्षकः श्लोकं लिखित्वा पाठयति ।
(घ) रमा स्थित्वा गीतं गायति ।
(ङ) शिष्यः सर्वदा गुरुं नत्वा पठति ।
(च) लेखकः आलोचनं कृत्वा लिखति ।

ANSWER उत्तर

Here the क्त्वा-word has no upasarga, so one of the given upasargas is added to the root, and then ल्यप् is used.
हिन्दी: यहाँ क्त्वा-युक्त शब्द में उपसर्ग नहीं है, इसलिए दिए गए उपसर्गों में से एक जोड़कर ल्यप् प्रत्यय लगाया जाता है।

(क) छात्रः गृहम् आगत्य (आ + गम् + ल्यप्) भोजनं करोति ।
गत्वा → **आगत्य** (given in the book as the example · पुस्तक में उदाहरण के रूप में दिया है)

NCERT Archive

(ख) माता वस्त्राणि प्रक्षाल्य (प्र + क्षल् [क्षालि] + ल्यप्) पचति ।
क्षालयित्वा → **प्रक्षाल्य**

(ग) शिक्षकः श्लोकं विलिख्य (वि + लिख् + ल्यप्) पाठयति ।
लिखित्वा → **विलिख्य**

(घ) रमा उत्थाय (उत् + स्था + ल्यप्) गीतं गायति ।
स्थित्वा → **उत्थाय**

(ङ) शिष्यः सर्वदा गुरुं प्रणम्य (प्र + नम् + ल्यप्) पठति ।
नत्वा → **प्रणम्य**

(च) लेखकः आलोच्य (आ + लोच् + ल्यप्) लिखति ।
आलोचनं कृत्वा → **आलोच्य**

QUESTION 5 प्रश्न 5

५. पाठे प्रयुक्तेन उपयुक्तपदेन रिक्तस्थानं पूरयत—

(क) सर्वैः एकचित्तीभूय .... उड्डीयताम्।

(ख) जालापहारकान् तान् .... पश्चाद् अधावत्।

(ग) अस्माकं मित्रं .... नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति ।

(घ) हिरण्यकः कपोतानाम् .... चकितस्तूष्णीं स्थितः ।

(ङ) यतोहि विपत्काले .... एव कापुरुषलक्षणम्।

ANSWER उत्तर

(क) सर्वैः एकचित्तीभूय **जालम् आदाय** उड्डीयताम्।
p. 13 (...having taken the net, let us fly up.)
हिन्दी: जाल लेकर उड़ चलें।

(ख) जालापहारकान् तान् **अवलोक्य** पश्चाद् अधावत्।
p. 13 (Having seen those carriers-off of his net, he ran after them.)
हिन्दी: अपने जाल को ले जाने वालों को देखकर वह उनके पीछे दौड़ा।

(ग) अस्माकं मित्रं **हिरण्यको** नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति ।
p. 13 (हिरण्यकः + नाम → हिरण्यको नाम)
हिन्दी: हमारा मित्र हिरण्यक नाम का मूषकराज गण्डकी के तट पर चित्रवन में रहता है।

(घ) हिरण्यकः कपोतानाम् **अवपातभयात्** चकितस्तूष्णीं स्थितः ।
p. 13 (Out of fear of the pigeons' descent.)
हिन्दी: कबूतरों के उतरने के भय से।

NCERT Archive

(ङ) यतोहि विपत्काले **विस्मयः** एव कापुरुषलक्षणम् ।
p. 12 (Amazement/panic in danger alone is a sign of a coward.)
हिन्दी: विपत्ति में घबराहट (विस्मय) ही कायर पुरुष का लक्षण है।

(क) जालम् आदाय · (ख) अवलोक्य · (ग) हिरण्यको · (घ) अवपातभयात् · (ङ) विस्मयः

QUESTION 6 प्रश्न 6

६. पाठे प्रयुक्तेन ल्यप्प्रत्ययान्तपदेन सह उपयुक्तं पदं योजयत—

(क) विकीर्य जालम्
(ख) विस्तीर्य जालापहारकान्
(ग) अवतीर्य उड्डीयताम्
(घ) अवलोक्य तद्वचनम्
(ङ) एकचित्तीभूय भूमौ
(च) प्रत्यभिज्ञाय तण्डुलकणान्

ANSWER उत्तर

(क) विकीर्य ⟶ **तण्डुलकणान्**
p. 12 — "तण्डुलकणान् विकीर्य"

(ख) विस्तीर्य ⟶ **जालम्**
p. 12 — "जालं विस्तीर्य"

(ग) अवतीर्य ⟶ **भूमौ**
p. 12 — "भूमौ अवतीर्य"

(घ) अवलोक्य ⟶ **जालापहारकान्**
p. 13 — "जालापहारकान् तान् अवलोक्य" (the line already drawn in the book · पुस्तक में रेखा पहले से खिंची है)

(ङ) एकचित्तीभूय ⟶ **उड्डीयताम्**
p. 13 — "एकचित्तीभूय जालम् आदाय उड्डीयताम्"

(च) प्रत्यभिज्ञाय ⟶ **तद्वचनम्**
p. 13 — "हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय"

NCERT Archive

QUESTION 7 प्रश्न 7

७. समासयुक्तपदेन रिक्तस्थानं पूरयत—

(क) गण्डक्याः तीरम् = ... तस्मिन् = ...

(ख) तण्डुलानां कणाः = ... तान् = ...

(ग) जालस्य अपहारकाः = ... तान् = ...

(घ) अवपाताद् भयम् = ... तस्मात् = ...

(ङ) कापुरुषाणां लक्षणम् = ... तस्मिन् = ...

ANSWER उत्तर

(क) गण्डक्याः तीरम् = **गण्डकीतीरम्** तस्मिन् = **गण्डकीतीरे**
षष्ठी-तत्पुरुषः (given in the book as the example · पुस्तक में उदाहरण के रूप में दिया है)

(ख) तण्डुलानां कणाः = **तण्डुलकणाः** तान् = **तण्डुलकणान्**
षष्ठी-तत्पुरुषः

(ग) जालस्य अपहारकाः = **जालापहारकाः** तान् = **जालापहारकान्**
षष्ठी-तत्पुरुषः

(घ) अवपाताद् भयम् = **अवपातभयम्** तस्मात् = **अवपातभयात्**
पञ्चमी-तत्पुरुषः

(ङ) कापुरुषाणां लक्षणम् = **कापुरुषलक्षणम्** तस्मिन् = **कापुरुषलक्षणे**
षष्ठी-तत्पुरुषः

NCERT Archive

QUESTION 8 प्रश्न 8

८. सार्थकपदं ज्ञात्वा सन्धिविच्छेदं कुरुत—

(क) इत्याकर्ण्य = ... + ... (ख) चित्रग्रीवोऽवदत् = ... + ...

(ग) बालकोऽत्र = ... + ... (घ) धैर्यमथाभ्युदये = ... + ... + ...

(ङ) भोजनेऽप्यप्रवर्तनम् = ... + ... + ... (च) नमस्ते = ... + ...

(छ) उपायश्चिन्तनीयः = ... + ... (ज) व्याधस्तत्र = ... + ...

(झ) हिरण्यकोऽप्याह = ... + ... + ...

(ञ) मूषकराजो गण्डकीतीरे = ... + ... + ...

(ट) अतस्त्वाम् = ... + ... (ठ) कश्चित् = ... + ...

ANSWER उत्तर

The visarga-sandhi rules from the page “अत्र इदम् अवधेयम्” are used: visarga before च/छ becomes **श्**; before त/थ becomes **स्**; अः before a letter of the 3rd, 4th, 5th class or य र ल व ह becomes **ओ**; अः before अ becomes **ओऽ**.
हिन्दी: “अत्र इदम् अवधेयम्” के विसर्ग-सन्धि नियम — च/छ से पहले विसर्ग का **श्**; त/थ से पहले **स्**; अः के बाद वर्ग का 3, 4, 5 वर्ण या य र ल व ह हो तो **ओ**; अः के बाद अ हो तो **ओऽ**।

(क) इत्याकर्ण्य = **इति + आकर्ण्य**
इ + आ → या (यण्) — given in the book as the example · पुस्तक में उदाहरण के रूप में दिया है

(ख) चित्रग्रीवोऽवदत् = **चित्रग्रीवः + अवदत्**
अः + अ → ओऽ — given in the book as the example · पुस्तक में उदाहरण के रूप में दिया है

(ग) बालकोऽत्र = **बालकः + अत्र**
अः + अ → ओऽ

(घ) धैर्यमथाभ्युदये = **धैर्यम् + अथ + अभ्युदये**
म् + अ → म (the final म् joins the next vowel · म् अगले स्वर से मिल जाता है)

(ङ) भोजनेऽप्यप्रवर्तनम् = **भोजने + अपि + अप्रवर्तनम्**
ए + अ → एऽ ; इ + अ → य

(च) नमस्ते = **नमः + ते**
विसर्ग before त → स् · त से पहले विसर्ग का स्

(छ) उपायश्चिन्तनीयः = **उपायः + चिन्तनीयः**
विसर्ग before च → श् · च से पहले विसर्ग का श्

(ज) व्याधस्तत्र = **व्याधः + तत्र**
विसर्ग before त → स् · त से पहले विसर्ग का स्

NCERT Archive

(झ) हिरण्यकोऽप्याह = **हिरण्यकः + अपि + आह**
अः + अ → ओऽ ; इ + आ → या

(ञ) मूषकराजो गण्डकीतीरे = **मूषकराजः + गण्डकी + तीरे**
अः + ग → ओ ; गण्डकी + तीरे = गण्डकीतीरे (गण्डक्याः तीरे)

(ट) अतस्त्वाम् = **अतः + त्वाम्**
विसर्ग before त → स् · त से पहले विसर्ग का स्

(ठ) कश्चित् = **कः + चित्**
विसर्ग before च → श् · च से पहले विसर्ग का श्

NCERT Archive

PR

CLASS 8 SANSKRIT · DEEPAKAM · CHAPTER 2

परियोजनाकार्यम्

Solutions · 2 questions · समाधान · २ प्रश्न

QUESTION 1 प्रश्न 1

१. पाठात् अधोलिखितानां क्रियापदानां प्रयोगकौशलं ज्ञात्वा तत्समानानि अन्यानि वाक्यानि रचयत—

तिरस्कुर्वन्ति | क्रियताम् | निवसति | आह | छेत्स्यति | सम्भाषसे | अब्रवीत् | उपसर्पति | युज्यते

यथा – तिरस्कुर्वन्ति – दुर्जनाः सज्जनं तिरस्कुर्वन्ति ।

(क) .... (ख) .... (ग) .... (घ) .... (ङ) .... (च) .... (छ) .... (ज) ....

ANSWER उत्तर

(क) क्रियताम् – सर्वैः स्वकर्तव्यं सम्यक् क्रियताम् ।

क्रियताम् = let it be done (passive imperative) · किया जाए

(ख) निवसति – रामः अयोध्यायां निवसति ।

निवसति = lives · रहता है

(ग) आह – माता पुत्रम् आह – “सत्यं वद” इति ।

आह = says / said · कहता है / कहा

(घ) छेत्स्यति – मूषकः दन्तैः रज्जुं छेत्स्यति ।

छेत्स्यति = will cut · काटेगा

(ङ) सम्भाषसे – त्वं मित्रैः सह कदा सम्भाषसे ?

सम्भाषसे = you talk · तुम बात करते हो

(च) अब्रवीत् – पिता पुत्रम् अब्रवीत् – “परिश्रमं कुरु” इति ।

अब्रवीत् = said · कहा

(छ) उपसर्पति – बालः मातुः समीपम् उपसर्पति ।

उपसर्पति = approaches · समीप आता है

(ज) युज्यते – छात्राणां कृते नियमितम् अध्ययनं युज्यते ।

युज्यते = is proper / is fitting · उचित है

NCERT Archive

QUESTION 2 प्रश्न 2

२. अनया कथया वयं स्वजीवने कां शिक्षां स्वीकर्तुं शक्नुमः इति अधिकृत्य कक्षायां परिचर्चां कुर्वन्तु ।

ANSWER उत्तर

Points for the class discussion, each drawn from the story: · कक्षा-चर्चा के बिन्दु, सब कथा से लिए गए:

१. संहतिः कार्यसाधिका — unity accomplishes even difficult tasks. · एकता कठिन कार्य भी सिद्ध करती है ।

The title and moral of the lesson; the pigeons flew away together with the net and the friends built the bridge together.
हिन्दी: पाठ का शीर्षक और सार — कबूतर जाल लेकर साथ उड़े और मित्रों ने मिलकर पुल बनाया ।

२. विपत्काले धैर्यम् — keep courage and do not panic in danger. · विपत्ति में धैर्य रखें, घबराएँ नहीं ।

“विपत्काले विस्मयः एव कापुरुषलक्षणम्” and the leader’s words “धैर्यम् अवलम्ब्य”.
हिन्दी: कायर का लक्षण विपत्ति में घबराना है; नायक ने धैर्य रखने को कहा ।

३. अविचारितं कर्म न कर्तव्यम् — never act without thinking. · बिना विचारे कोई कार्य न करें ।

The pigeons ignored Chitragriva’s warning and were caught in the net.
हिन्दी: कबूतरों ने चित्रग्रीव की चेतावनी अनसुनी की और जाल में फँस गए ।

४. वृद्धानां वचनं ग्राह्यम् — listen to the advice of the wise and the elders. · बड़ों और समझदारों की सलाह मानें ।

Verse 1 of the story; a leader’s caution should be taken seriously.
हिन्दी: कथा का पहला श्लोक; नायक की चेतावनी गम्भीरता से लेनी चाहिए ।

५. आश्रितवात्सल्यम् — a good leader first cares for those who depend on him. · अच्छा नेता पहले अपने आश्रितों की रक्षा करता है ।

Chitragriva asked Hiranyaka to cut the others’ bonds first, “पूर्वं मदाश्रितानाम्”.
हिन्दी: चित्रग्रीव ने कहा कि पहले मेरे आश्रितों के बन्धन काटो ।

६. मित्रसाहाय्यम् — true friends help in difficulty. · सच्चे मित्र कठिनाई में सहायता करते हैं ।

Hiranyaka cut the bonds of all the pigeons.
हिन्दी: हिरण्यक ने सभी कबूतरों के बन्धन काट दिए ।

Main lesson: working together with courage and thoughtfulness, even small and weak ones can overcome great difficulties — “अल्पानामपि वस्तूनां संहतिः कार्यसाधिका”.
हिन्दी: साहस और विचारपूर्वक मिलकर कार्य करने से छोटे और कमज़ोर भी बड़ी कठिनाइयों को पार कर सकते हैं ।

NCERT Archive